दिनाङ्क :- 16.08.2026 प्रात: - 06:55

## अथवार्ता:

### प्रधानमन्त्री - स्वातन्त्र्यदिवसः

देशेन ह्यः अशीतितमः स्वातन्त्र्यदिवसः आचरितः। अस्मिन् अवसरे प्रधानमन्त्री नरेन्द्रमोदी रक्तदुर्गस्य प्राचीरात् राष्ट्रियध्वजम् आरोहितवान् तथा अनेकाः महत्त्वपूर्णाः घोषणाः कृतवान्। राष्ट्रं सम्बोधयन् प्रधानमन्त्री कथितवान् यत् विगतेषु द्वादशवर्षेषु देशस्य कोटिशः नागरिकाः स्वसङ्कल्पेन समर्पणेन च देशं नूतनासु उन्नतिषु नेतुं सर्वसम्भवं प्रयत्नम् अकुर्वन्। प्रधानमन्त्री सबलं प्रतिपादितवान् यत् बृहन् स्वप्नाः दृढतराः सङ्कल्पाश्च राष्ट्रस्य प्रयत्नानां समग्रं स्तरं सामर्थ्यं च वर्धयन्ति।

विकसितभारताय यूनां महिलानां च सशक्तीकरणे बलं दत्त्वा प्रधानमन्त्री नरेन्द्रमोदी विभिन्नानां लोकसेवापरीक्षाणां कृते निर्धनमध्यम-वर्गीयपरिवाराणां युवभ्यः निःशुल्कं अन्तर्जालमाध्यमेन प्रशिक्षणं प्रदातुं घोषणां कृतवान्। सः इदमपि घोषितवान् यत् प्रशासनेन आगामि-एकवर्षे एककोटियुवभ्यः ए.आई. इति कृत्रिमबुद्धिमत्ताकौशलस्य प्रशिक्षणं प्रदातुं निर्णयः कृतः।

---------------------------------------------------

### अमितशाहः - शिलान्यासः

केन्द्रीयसहकारितामन्त्री अमितशाहः अद्य राजस्थानस्य अल्वरनगरे स्थिते अल्वर-सरस-दुग्धपरिसरे नूतनस्य दुग्धसंयन्त्रस्य आधारशिलां स्थापयिष्यति। सहकारितामन्त्रालयेन सूचितं यत् अस्मिन् अवसरे अन्तर्जालमाध्यमेन शिलान्यासः क्रियते तथा राजस्थानस्य सप्तदश-जनपदेषु द्विषष्ठ्युत्तर-द्विशताधिक-षड्सहस्र-कोटिरूप्यकाणां विभिन्नविकासपरियोजनानाम् उद्घाटनमपि अन्तर्जालमाध्यमेन करिष्यते। एतदतिरिक्तं, आजीविकोत्सवस्य अन्तर्गतं नवनियुक्तेभ्यः पञ्चशताधिक-दशसहस्राधिकेभ्यः कर्मिभ्यः नियुक्तिपत्राणि वितरिष्यन्ते।

---------------------------------------------------

### उपराष्ट्रपतिः - तमिलनाडुः

उपराष्ट्रपतिः सी. पी. राधाकृष्णन् अद्य आरभ्य तमिलनाडुराज्यस्य द्विदिवसीययात्रायां भविष्यति। यात्रावधौ असौ चेन्नई-चेङ्गलपट्टु-तिरुवरूर-तञ्जावूर-नगरेषु विविधेषु शैक्षणिकेषु, स्मारकेषु साहित्यिकेषु च कार्यक्रमेषु भागं ग्रहीष्यति। अद्य श्रीराधाकृष्णन् चेङ्गलपट्टुनगरे एस्.आर्.एम्. विज्ञान-प्रौद्योगिकी-संस्थायाः द्वाविंशतितम-दीक्षान्तसमारोहे भागं ग्रहीष्यति। सः चेन्नईनगरे नागालैण्ड-मणिपुर-पश्चिमबङ्गाल-राज्यानां पूर्वराज्यपालस्य प्रथमपुण्यतिथेः कार्यक्रमेऽपि भागं ग्रहीष्यति। ततः परं उपराष्ट्रपतिः चेन्नईनगरे 'Echoes of a Nationalist Mind' इति पुस्तकस्य विमोचनकार्यक्रमे भागं ग्रहीष्यति। अयं पुस्तक: हिन्दुमुन्नानी-सङ्घटनस्य संस्थापकस्य दिवङ्गतस्य के. रामगोपालन् इत्येतस्य विचारान् आलेखान् च आधृत्य रचितः अस्ति।

-----------------------------------------------------

## दिल्लीपरिवहननिगमः

दिल्लीप्रशासनेन दिल्लीपरिवहननिगमस्य बसयानेषु महिलायात्रिणां कृते प्रचलितायाः कागदनिर्मित-पाटलचिटिका-व्यवस्थायाः अवधिः अस्य मासस्य एकत्रिंशत् दिनाङ्कपर्यन्तं विस्तृतः अस्ति। परिवहनविभागस्य आदेशानुसारं निःशुल्कबसयात्रायै महिलाः डीटीसी अथ दिल्ली-क्लस्टर इत्येतयोः बसयानेषु कागदनिर्मित-पाटलचिटिकायाः उपयोगं निरन्तरं कर्तुं शक्नुवन्ति। इयं सुविधा पूर्वं ह्यः समाप्ता भवितुम् आसीत् तथा अद्य आरभ्य पिङ्क-सहेली-स्मार्ट्-कार्ड इत्येतस्य अनिवार्यता भवितुम् आसीत्। अधिकाभ्यः महिलाभ्यः स्मार्ट्-कार्ड इति प्राप्तेः अवसरं प्रदातुं प्रशासनेन कागदनिर्मित-पाटलचिटिका-व्यवस्थायाः अवधिः विस्तारितः। साम्प्रतं यावत् दिल्ल्यां प्रायः अष्टादशलक्षं पिङ्क-सहेली-कार्ड इत्येतानि पत्राणि वितरितानि सन्ति।

-----------------------------------------------------

## सूर्यपथ-त्रिरङ्गः - संस्कृतिमन्त्रालयः

प्रथमवारम् आयोजिता सूर्यपथ-त्रिरङ्ग-वैश्विक-यात्रा ह्यः सम्पन्ना। इयं यात्रा पश्चिमदिशि फिजी देशादारभ्य संयुक्तराज्य-अमेरिकापर्यन्तं चतुःपञ्चाशत्-देशेषु बहुषु च कालक्षेत्रेषु सम्पन्ना। विदेशमन्त्रालयेन सूचितं यत् सूर्यपथ-त्रिरङ्ग-पदक्षेपः 'हर घर तिरङ्गा' अभियानस्य अन्तर्गतं आयोजिता। फिजीदेशस्थित-भारतीयोच्चायोगात् प्रारब्धा इयं त्रिरङ्गयात्रा एकस्मात् सूर्योदयात्

अपरं सूर्योदयपर्यन्तं त्रिरङ्गस्य भावनां प्रसारितवान् तथा विश्वस्य विभिन्नेषु भागेषु स्थितं भारतीयसमुदायं भारतस्य च मित्राणि परस्परं संयोजितवान्।

-----------------------------------------------------

<u>अमृतोद्यानम्</u>

अमृतोद्यानम् अद्य आरभ्य आगामिमासस्य पञ्चदशदिनाङ्कपर्यन्तं सामान्यजनेभ्यः उद्घाटितं भविष्यति। अस्माकं वार्ताहरानुसारम्, उद्यानं प्रातः दशवादनात् सायं षड्वादनपर्यन्तं उद्घाटितं भविष्यति। अन्तिमप्रवेशः सायं पञ्चवादनपर्यन्तं भविष्यति। अनुरक्षणकार्याय उद्यानं प्रत्येकं सोमवासरे पिधास्यति।

।। <u>इति वार्ता:</u>।।